**आकाशवाणी**

**दिनाङ्क :- 26.09.2024**

**सायम् - 06:20**

**<u>मुख्यवार्ता:</u>**

- प्रधानमन्त्री नरेन्द्रमोदी अद्य सायम् आभासीयमाध्यमेन परमरुद्रः इत्याख्यं सुपर कम्प्यूटिंग-सिस्टम-संगणक-तन्त्रस्य ऋतुविज्ञानस्य ऋतुदशा-विज्ञानस्य कृते च उच्चगुणवत्तायुक्त-संगणकस्य उद्घाटनं कृतवान्।
- हरियाणायाम् एकस्मै चरणाय जम्मूकश्मीरे च तृतीयाय अन्तिमाय च चरणाय विधानसभानिर्वाचनाय प्रचाराभियानं तीव्रं जातम्।
- फ्रांसदेशीयः राष्ट्रपतिः इमैनुएल-मैक्रों इत्येषः संशोधितायां संयुक्तराष्ट्र-सुरक्षा-परिषदि स्थायिसदस्यत्वेन भारतं प्रविष्टुं समर्थनं स्वीयं प्रकटितवान्।
- बैडमिण्टन-प्रतिस्पर्धायां भारतीय-क्रीडकः कीदाम्बी-श्रीकान्तः मकाऊ-मुक्तस्य पुरूषैकलवर्गस्य प्रागुपान्त्यचक्रे प्रविष्टवान्।

**<u>अथ वार्ताः विस्तरेण</u>**

**<u>प्रधानमन्त्री परमश्रेष्ठः</u>**

प्रधानमन्त्री नरेन्द्रमोदी अद्य सायम् आभासीयमाध्यमेन परमरुद्रः इत्याख्यं सुपर कम्प्यूटिंग-सिस्टम-संगणक-तन्त्रस्य ऋतुविज्ञानस्य ऋतुदशा-विज्ञानस्य कृते च उच्चगुणवत्तायुक्त-संगणकस्य उद्घाटनं कृतवान् । ध्येयमस्ति यत् प्रायः त्रिंशदुत्तरैक- कोटि-रूप्यकैः परमरुद्रः इत्याख्यः समुच्चगुणवत्तायुतः संगणकः 'राष्ट्रिय-सुपर-कम्प्यूटिंग-मिशन' इत्यभियानान्तर्गतं दैशिकरूपेण एव विकसितः अस्ति ।

**<u>राष्ट्रपतिः द्रौपदी मुर्मुः</u>**

राष्ट्रपतिः द्रौपदीमुर्मुवर्या अद्य लद्दाखस्य सियाचिन-शिबिरस्य भ्रमणं कृतवती। असौ तत्र सियाचिन-हिमशिखर-सीमक्षेत्रे नियुक्तैः सैन्याधिकारिभिः साकं सम्भाषणम् आचरितवती। श्रीमती मुर्मुः सैनिकान् सम्बोधयन्ती समाह्वनपूर्णे विषमे पारिस्थितिक-तन्त्रे राष्ट्र-रक्षण-कार्यार्थं सैन्यभटानां तेषां श्लाघां कृतवती। अमुना तेषां सैन्यभटानां परिवार-जनान्प्रति आभारः प्रकटितः।

***श्रूयतां तावत् किं ब्रूते राष्ट्रपतिः 17 से.***

राष्ट्रपतिः सियाचिन-आधार-शिबिरे निर्मित-युद्ध-स्मारके हुतिंगतेभ्यः वीर-भटेभ्यः हार्दिक-श्रद्धाञ्जलीन् समार्पयत्। ध्येयमस्ति यत- पूर्वराष्ट्रपतेः डॉ अब्दुल कलामस्य श्रीरामनाथ-कोविन्दस्य च पश्चात् सियाचिन-

हिम-शिखरस्य यात्राकर्त्री तृतीया राष्ट्रपतिः संवृता अस्ति। एतद् हि विश्वस्य सर्वोच्चं सैन्यक्षेत्रं वर्तते। यत्र भारतीय-सैन्यबलं राष्ट्रक्षणपरं वर्तते।

**जम्मूकश्मीर-निर्वाचनम्**

हरियाणायाम् एकस्मै चरणाय जम्मूकश्मीरे च तृतीयाय अन्तिमाय च चरणाय विधानसभानिर्वाचनाय प्रचाराभियानं तीव्रं जातम्। भाजपेतिदलस्य वरिष्ठनेता प्रधानमन्त्री नरेन्द्रमोदी च अद्य आभासिय-माध्यमेन हरियाणायाः भाजपेतिदलकार्य-कर्तृभिः साकं सम्वादं विहितवान्। हरियाणायां नवतिः विधानसभासनेभ्यः मतदानम् अग्रिममासस्य पञ्चमे दिनाङ्के निर्धारितमस्ति।

**विराम:**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**जम्मू कश्मीर निर्वाचनम्**

जम्मूकश्मीरे विधान-सभा-निर्वाचनानाम् अन्तिमचरणस्य प्रचाराभियानं सजवं प्रवर्धते। गृहमन्त्री अमितशाह जम्मू-कश्मीरस्य उधमपुर-जनपदे जनसभां सम्बोधितवान्। अमुना कठुआ-क्षेत्रेऽपि जनसभाः कृताः। जनान् सम्बोधयन् श्रीशाहः तत्रत्यान् जनान् भाजपा-दलाय मतदानार्थं विलोभितवान्। अपरत्र च प्रधानमन्त्री श्रीनरेन्द्र मोदी दलस्य प्रचाराभियानं तीव्रीकर्तुं सितम्बर-अष्टाविंश्यां जम्मूं गच्छति। लोकसभायां विपक्ष-नेता राहुलगान्धी ह्यो जम्मूकश्मीर-वास्तव्यैः साकं वार्तांचितिं कृतवान्। कांग्रेस-दलाय मतयाचनां च कृतवान्। पीपुल्स-डेमोक्रेटिक-पार्टीति दलस्य अध्यक्षा पूर्वमुख्यमन्त्री महबूबामुफ्ती चापि ह्यस्तने जम्वां निज-दलस्य प्रत्याशिनां समर्थने पथप्रदर्शनीम् आचरितवती केन्द्र शासिते प्रदेशे।

**जम्मूकश्मीरनिर्वाचनम्**

जम्मूकश्मीरे अन्तिम-चरणस्य विधानसभानिर्वाचन सर्वेभ्यो राजनीतिक-दलेभ्योऽतिशयमेव महत्त्वपूर्णम् अस्ति। अन्तिम-चरणार्थं अक्टूबर-प्रथमायां चत्वारिंशत्-विधानसभा-आसनानां कृते मतदानम् आयोक्ष्यते। अस्य चरणस्य अन्तर्गतं जम्वाः चतुर्विंशतिः कश्मीरस्य षोडश विधान-सभासनेषु मतदानम् आयोक्ष्यते।

**उत्तरप्रदेश- स्वच्छताभियानमd**

उत्तरप्रदेशप्रशासनेनाद्य प्रातः निर्बाधतया पञ्चपञ्चाशदधिकैकशतं होरां यावत् स्वच्छताभियानं समारब्धम् । अभियानमिदं अक्टूबरमासस्य द्वितीये दिनाङ्के महात्मागान्धिनः पञ्चपञ्चाशदधिकैकशतमे जयन्त्यवसरे सम्पन्नतां प्राप्स्यति। **स्वभाव-स्वच्छता- संस्कार स्वच्छता** इत्यस्मिन् विषये आधारितस्य अभियानस्योद्देश्यं नगरीय- क्षेत्रेषु स्वच्छतायाः पर्यावरण-जागरूकतायाः संवर्धनमिति अस्ति। मुख्यमन्त्री योगी आदित्यनाथः नगर-विकासविभागाय अभियानस्य अस्य सफलतां सुनिश्चितुं निर्देशं प्रदत्तवान्।

**प्रधानमन्त्री- चतुरङ्गक्रीडा**

प्रधानमन्त्री नरेन्द्रमोदी ह्यः नवदिल्ल्यां निजावासे भारतीय-चतुरङ्ग- ओलम्पियाड्-समूहस्य क्रीडकैः सह वार्तां समाचरितवान्। ध्येयं वर्तते भारतीयदलेन अनेन हंगरीदेशे बुडापेस्टनगरे आयोजित चतुर्विंशत्यधिक-द्विसहस्रतमे ओलम्पियाङ-नामाभिधेयके द्वन्द्वे महिला-पुरूषयोः दलेन उभयोः वर्गयोः स्वर्णपदकं विजितम्।

**औषध विज्ञान- अरूणीशः**

औषधविभागस्य सचिवः अरूणीश-चावलाइत्येषः अद्य प्रतिपादितवान् यत् चिकित्सा-प्रौद्यौगिकी औषधोद्योगः च भारते निर्याताय प्रमुखक्षेत्रत्वेन समायाताः। नवदिल्ल्यां वार्षिके औषधोद्योग-शिखर-सम्मेलने सचिवः न्यगादीत् यत् विगेतषु वर्षेषु भारते निर्मितानाम् औषधीनां पञ्चाशत्प्रतिशतं यावत् निर्यातं समग्रविश्वे जातम्। अपि च अस्मिन् क्षेत्रे निर्यातस्य सम्भावनाः साम्प्रमपि सन्ति इति। एतदर्थं मेक इन इण्डिया इत्यनेन पदक्षेपेण बृहत्तमे स्तरे देशं महाशक्तिं निर्मातुं साहाय्यं प्रदत्तम्।

**वेरूत-भारतीय-दूतावास-परामर्शः**

लेबनानस्य बेरूत-स्थितेन भारतीय दूतावासेन इजराइलदेशस्य हिज्बुल्लाह-गुल्मस्य च मध्ये विवर्धमानं संघर्षं निध्याय भारतीय-नागरिकाः परामृष्टाः सन्ति यत् ते यथाशीघ्रं लेबनान-देशं त्यजेयुः। अथ च न केऽपि भारतीयाः मध्येयुद्धम् लेबनानस्य यात्रा नैव कुर्युः। येन तेषां प्राणसङ्कटं नैव भवेत्। अपि च दूतावासेन एतदपि भणितं यद् ये जनाः अत्रैव केनापि कारणेन निरूद्धाः सन्ति उत स्थातुं विवशाः सन्ति चेत् ते आवश्यक्तां विना गृहाद् बहिः नैव गच्छेयुः। सावधानतया कार्यं विदध्युः। निरन्तरं दूतावासस्य सम्पर्के तिष्ठेयुः चेति। ध्येयमस्ति यत् सद्यस्तनीने इजरायलदेशीये वायवीयाक्रमणे लेबनान-देशस्य अष्टपञ्चाशदुत्तर-पञ्च-शतमिताः जनाः पञ्चतां प्राप्ताः सन्ति। मृतकेषु पञ्चाशन्मिताः बालकाः अपि समाविशन्ति।

**त्वरितसंघर् विरामस्याह्वनम्**

अमेरिका-फ्रांसाभ्यां सहितैः तत्सहयोगिभिः दैशैः इजराइलस्य हिजबुल्लाहस्य च मध्ये युद्धस्य समेधनानन्तरं इजराइल-लेबनान-सीम्नि एकविंशति दिनेभ्यः तत्कालमेव संघर्ष-विरामस्य आह्वानं कृतम् अस्ति। एतद् विषये अमेरिकाःफ्रांस-यूरोपीयसंघ-जर्मनी- सऊदीअरब-कतर-संयुक्त अरब अमीरात-समेतैः अन्यैरपि सहभागिभिः देशैः वक्तव्यं प्रख्यापितम् अस्ति।

**भारत-संयुक्त्-राष्ट्र-सुरक्षा-परिषत्**

फ्रांसदेशीयः राष्ट्रपतिः इमैनुएल-मैक्रों इत्येषः संशोधितायां संयुक्तराष्ट्र-सुरक्षा-परिषदि स्थायिसदस्यत्वेन भारतं प्रविष्टुं समर्थनं स्वीयं प्रकटितवान्। श्रीमैक्रौं इत्येषः अद्य प्रातः न्यूयॉर्कनगरे संयुक्तराष्ट्र-महासभायाः नवसप्ततितमे चर्चासत्रे वार्तां इमां कथितवान्। फ्रांसदेशीयेन अनेन राष्ट्रपतिना सबलं प्रत्यपादयत् यत् भारत-जर्मनी-जापान-ब्राजील-देशाः स्थायिदेशाः भवेयुरिति।

**<u>बैडमिण्टनस्पर्धा</u>**

बैडमिण्टन-प्रतिस्पर्धायां भारतीय-क्रीडकः कीदाम्बी-श्रीकान्तः मकाऊ-मुक्तस्य पुरूषैकलवर्गस्य प्रागुपान्त्यचक्रे प्रविष्टवान्। प्र-प्रागुपान्त्यचक्रे श्रीकान्तेन आयुषशेट्टी एकविंशतिः त्रयोदश एकविंशतिः-अष्टादश च इत्यङ्कान्तरालेन पराजितः।

**।। इति वार्ताः।।**